# भारतीय शिक्षा बोर्ड
## अर्द्धवार्षिक परीक्षा
## संस्कृतम् - कक्षा-८
वर्षः - २०२६-२७

**निर्धारितसमयः - होरात्रयम्** **अधिकतमाङ्काः - ८०**

**सामान्यनिर्देशाः —**

- प्रश्नान् ध्यानेन पठत।
- प्रश्नपत्रं पठनाय १५ निमेषाणां अतिरिक्तः समयः प्रदत्तः अस्ति। अस्मिन् काले छात्राः केवलं प्रश्नपत्रं पठिष्यन्ति।
- प्रश्नपत्रे १९ प्रश्नाः सन्ति, सर्वे च प्रश्नाः अनिवार्याः सन्ति।
- अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
    - ➢ खण्डः (क) अपठितावबोधनम् १० अङ्काः
    - ➢ खण्डः (ख) रचनात्मकंलेखनम् २० अङ्काः
    - ➢ खण्डः (ग) अनुप्रयुक्त व्याकरणम् २० अङ्काः:
    - ➢ खण्डः (घ) पठितावबोधनम् ३० अङ्काः
- खण्ड 'क' प्रश्नसंख्या-१ कृते १० अङ्काः निर्धारिताः सन्ति।
- खण्ड 'ख' प्रश्नसंख्या २ तः ५ पर्यन्तं प्रत्येकं प्रश्नाय ५ अङ्काः निर्धारिताः सन्ति।

**सामान्य निर्देश—**

- प्रश्नों को ध्यान से पढ़ें।
- प्रश्नपत्र को पढ़ने के लिए 15 मिनट का अतिरिक्त समय दिया गया है। इस अवधि में छात्र केवल प्रश्नपत्र पढ़ेंगे।
- इस प्रश्न पत्र में केवल 19 प्रश्न हैं और सभी प्रश्न अनिवार्य हैं।
- इस प्रश्नपत्र में चार खण्ड हैं-
    - ➢ खण्डः (क) अपठित अवबोधन 10 अंक
    - ➢ खण्डः (ख) रचनात्मक लेखन 20 अंक
    - ➢ खण्डः (ग) अनुप्रयुक्त व्याकरण 20 अंक
    - ➢ खण्डः (घ) पठित अवबोधन 30 अंक
- खण्ड 'क' प्रश्नसंख्या 1 के लिए 10 अंक निर्धारित हैं।
- खण्ड 'ख' प्रश्न संख्या 2 से 5 तक प्रत्येक प्रश्न के लिए 5 अंक निर्धारित किये गये हैं।

- खण्ड 'ग'-प्रश्नसंख्या ६ तः ९ पर्यन्तं प्रत्येकं प्रश्नाय ५ अङ्काः निर्धारिताः सन्ति।
- खण्ड 'घ'- प्रश्नसंख्या १० तः १४ पर्यन्तं प्रत्येक प्रश्नाय ४ अङ्काः, एवं प्रश्नसंख्या १५ तः १९ पर्यन्तं प्रत्येकं प्रश्नाय २ अङ्कौ निर्धारितौ स्तः।

- खण्ड 'ग' प्रश्नसंख्या 6, से 9 तक प्रत्येक प्रश्न के लिए 05 अंक निर्धारित किये गये हैं।
- खण्ड 'घ' प्रश्नसंख्या 10 से 14 तक प्रत्येक प्रश्न के लिए 4 अंक एवं 15 से 19 तक प्रत्येक प्रश्न के लिए 02 अंक निर्धारित किये गये हैं।

---

## खण्डः-क (अपठितावबोधनम् )

1. गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतेन लिखत— **10**

मानवं परितः पृथ्वी, जलम्, आकाशः, वायुः च सर्वे पर्यावरणस्य घटकाः सन्ति। पर्यावरणस्य प्रदूषणेन जनाः रूग्णाः भवन्ति। दूषितं जलं पीत्वा उदररोगेण पीडिताः भवन्ति। वायुप्रदूषणेन, श्वासरोगेण, ज्वरेण च दुःखिताः भवन्ति। रासायनिकोर्वरकाणां प्रयोगेण भूमिः दूषिता भवति। इदं सम्यक् ज्ञातव्यं यत् पर्यावरणस्य रक्षणे एव अस्माकं रक्षणं भविष्यति। प्रदूषणस्य समस्यायाः समाधानाय स्थाने स्थाने वृक्षाः रोपणीयाः, नदीषु अवकरादयः न क्षेपणीयाः, एवं वनानां पर्वतानां च संरक्षणम् करणीयम्। एतैः प्रयत्नैः पवनः शुद्धः, जलं निर्मलं, भूमिः च उर्वरा भविष्यति।

**प्रश्नाः**

(क) एकेन पदेन उत्तरयत (केवलं प्रश्नद्वयम्)— **1×2=2**

(i) केषां प्रयोगेण भूमिः दूषिता भवति?

(ii) प्रदूषणेन के रूग्णाः भवन्ति?

(ii) कुत्र अवकरादयः न क्षेपणीयाः?

(ख) पूर्णवाक्येन उत्तरयत— **2×2=4**

(i) कस्य रक्षणे एव अस्माकं रक्षणं भविष्यति?

(ii) पर्यावरणस्य घटकाः के सन्ति?

(ग) यथानिर्देशम् उत्तरयत— **1×3=3**

(i) 'स्वच्छम्' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम्?

(क) प्रदूषितम् (ख) पवनम् (ग) निर्मलम्

(ii) 'जलम्' इति विशेष्यपदस्य विशेषणपदं किम् अत्र प्रयुक्तम्?

(क) पीत्वा (ख) दूषितम् (ग) पीडिताः

(iii) 'स्वस्थाः' इति पदस्य किं विपरीतार्थकं पदं गद्यांशे प्रयुक्तम्?

(क) रूग्णाः (ख) दूषिताः (ग) जनाः

(घ) अस्य अनुच्छेदस्य कृते उपयुक्त-शीर्षकं संस्कृतेन लिखत। **1×1=1**

## खण्डः-ख (रचनात्मक-कार्यम्)

1. चित्रं दृष्ट्वा पट्टिकायां लिखितशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत—

**1×5=5**



उद्यानम्, बालाः, खेलन्ति, चित्रं, एका, बाला, पश्यति, रचयति, उपविशतः, दोलायाम्, पादकन्दुकेन, युगलौ, वृक्षाः, पुष्पाणि, सन्ति।

3. अधोलिखितं संवादं पट्टिकायां प्रदत्तशब्दानां सहायतया पूरयित्वा पुनः लिखत—

**1×5=5**

आचार्यः- अर्णव! अस्माकं देशस्य नाम किम्?

अर्णवः- आचार्य! (i) ________________।

आचार्यः- भारतस्य राजधानी का?

अर्णवः- (ii) ______________।

आचार्यः- एकः रक्तदुर्गः (लालकिला) दिल्ल्यां वर्तते, परं अन्यः रक्तदुर्गः कस्मिन् नगरे अस्ति?

अर्णवः- महोदय! (iii) ______________।

आचार्यः- 'आगरा' नगरे अन्यं दर्शनीयं किमस्ति?

अर्णवः- (iv) ______________।

आचार्यः- 'आगरा' जनपदं कस्मिन् राज्ये वर्तते?

अर्णवः- महोदय! (v) ______________।

- 'आगरा' जनपदम् उत्तरप्रदेश-राज्ये वर्तते।
- अस्माकं देशस्य नाम भारतवर्षम् अस्ति।
- 'आगरा' नगरे प्रमुखं दर्शनीयं 'ताजमहल' इति अस्ति।
- अन्यः रक्तदुर्गः आगरानगरे अस्ति।
- भारतस्य राजधानी 'दिल्ली' अस्ति।

4. अधोलिखितां कथां पट्टिकायां प्रदत्तशब्दानां सहायतया पूरयित्वा पुनः लिखत—

**1/2×10=5**

(i) __________ एकः प्रसिद्धः सम्राट् आसीत्। तस्य मन्त्री बीरबलः अति (ii) __________ आसीत्। तस्य बुद्धिचातुर्येण (iii) __________ भूत्वा अकबरः अनेकवारं तं (iv) __________ । अकबरस्य राजप्रासादस्य समक्षम् एकः (v) __________ आसीत्। एकदा शीतकाले अकबरः (vi) __________ अकथयत् यत् कोऽपि अस्मिन् (vii) __________ पूर्णरात्रौ स्थातुं न समर्थः। यदि कोऽपि एतत् (viii) __________ अहं तस्मै लक्षशतं (ix) __________ दास्यामि। इदम् आकर्ण्य (x) __________ घोषणाकृता।

बुद्धिमान्, अकबरः, बीरबलेन, प्रसन्नः, पुरस्कृतवान्, बीरबलम्, तडागे, मुद्राः, तडागः, करिष्यति

5. भवत्याः, नाम लक्ष्मीः। भवती ज्वरग्रस्ता जाता। अतः दिनद्वयस्य अवकाशार्थं प्रधानाचार्यां प्रति लिखिते पत्रे पट्टिका-प्रदत्तशब्दानां सहायतया पत्रं पूरयित्वा पुनः लिखत—

**1/2×10=5**

सेवायाम्,

(i) __________ महाभागाः !

आदर्शविद्यालयः गाजियाबादः

विषयः— (ii) __________ प्रार्थनापत्रम्।

मान्याः,

(iii) __________ इदमस्ति यत् अहं अष्टमकक्षायाः (iv) __________ अस्मि। अहं ज्वरेण ग्रस्ता (v) __________। अतः अहं (vi) __________, यत् मह्यं (vii) __________ अवकाशं (viii) __________ माम् (ix) __________। धन्यवादः।

भवदीया छात्रा

(x) __________

कक्षा- अष्टमी

| |
|---|
| लक्ष्मीः, प्रधानाचार्याः, अनुग्रह्णन्तु, दिनद्वयस्य, दत्वा, अस्मि, निवेदनम्, अवकाशाय, छात्रा, प्रार्थयामि |

## खण्डः-ग (अनुप्रयुक्त-व्याकरणम्)

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिं सन्धिविच्छेदं वा कुरुत— (केवलं पञ्च)

**1×5=5**

(क) स यस्य मूर्धानमलङ्करोति।

(ख) सर्पयुक्ते गृहे वासो मृत्युरेव न संशयः।

(ग) समानी प्रपा सह वोऽन्नभागः।

(घ) नरास्तुष्टाः धनैः स्वैः स्वैरलुब्धाः सत्यवादिनः।

(ङ) सर्वे <u>नराश्च</u> नार्यश्च धर्मशीला: सुसंयता:।

(च) <u>धर्मान्न</u> प्रमदितव्यम्।

(छ) एतेन ज्ञायते नूनं <u>तपोवनमिदम्</u>।

7. प्रदत्तेभ्य: विकल्पेभ्य: समुचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत— (केवलं पञ्च) **1×5=5**

(क) आचार्य: ______________ विद्यां यच्छति।

(i) शिष्यात् (ii) शिष्यम् (iii) शिष्याय

(ख) सेवका: ______________ प्रणमन्ति।

(i) राजानम् (ii) राज्ञे (iii) राज्ञा

(ग) ______________ सेवा करणीया।

(i) गाम् (ii) गवां (iii) गवे

(घ) श्रीकृष्ण: ______________ मातरं प्रार्थयति।

(i) दधिने (ii) दधि (iii) दधिन:

(ङ) ______________ जलं पिबाम:।

(i) मया (ii) अहम् (iii) वयम्

(च) ______________ मधुरता भवति।

(i) मधुना (ii) मधुन: (iii) मधुनि

8. प्रदत्तेभ्य: विकल्पेभ्य: समुचितं धातुरूपं चित्वा रिक्तस्थानानि पूरयत— (केवलं पञ्च) **1×5=5**

(क) कुम्भकर्ण: षण्मासपर्यन्तम् ______________ ।

(i) अस्वपत् (ii) अस्वपम् (iii) अस्वप:।

(ख) कुक्कुरा: रात्रौ न ______________ ।

(i) शेध्वे (ii) शेमहे (iii) शेरते।

(ग) शिशवः दुग्धाय ______________ ।

(i) रुदन्ति (ii) रोदिषि (iii) रुदिमः।

(घ) गुरुकुले छात्राः सहैव भोजनम् ______________ ।

(i) अदन्ति (ii) अत्ति (iii) अत्सि।

(ङ) अहं प्रतिदिनं ______________ ।

(i) जुहोति (ii) जुहोमि (iii) जुहोषि

(च) यूयं न ______________ ।

(i) अरुदित (ii) अरुदिम (iii) अरुदिन्।

9. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृतिप्रत्ययविभागं संयोजनं वा कुरुत— (केवलं पञ्च) **1×5=5**

(क) यदर्थमिच्छामि वपुः विमोक्तुम्।

(ख) वृक्षविवरात् निष्क्रम्य कृष्णसर्पः अपत्यानि भक्षयति।

(ग) सम्यञ्चः सव्रता भू + क्त्वा वाचं वदत भद्रया।

(घ) दृश् + तुमुन् शक्यमयोध्यायां नाविद्वान् न च नास्तिकः।

(ङ) धर्मान्न प्र + मद् + तव्यत्।

(च) भोः! पूर्वं प्रविष्टाः स्मः।

## खण्डः-घ (पठितावबोधनम्)

10. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत— **4**

अस्ति कस्मिंश्चिद् वनप्रदेशे नानाजलचरसनाथं महत् सरः। तत्र च कृताश्रयो बक एको वृद्धभावम् उपागतो मत्स्यान् व्यापादयितुम् असमर्थः ततश्च क्षुत्क्षामकण्ठः सरस्तीरे उपविष्टो मुक्ताफलप्रकर-सदृशैः अश्रुप्रवाहैः धरातलम् अभिषिञ्चन् रुरोद। एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरम् इदम् ऊचे-माम! किमद्य त्वया यथापूर्वम् आहारवृत्तिः नानुष्ठीयते? केवलम् अश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते।

**प्रश्नाः**

(क) एकेन पदेन उत्तरयत— **1/2×2=1**

(i) कस्मिंश्चिद् वनप्रदेशे कीदृशं महत् सरः आसीत्?

(ii) केवलं काभ्यां सनिःश्वासेन स्थीयते?

(ख) पूर्णवाक्येन उत्तरयत— **1×1=1**

(i) कुलीरकः दुःखेन दुःखितो भूत्वा सादरं किम् ऊचे?

(ग) यथानिर्देशम् उत्तरयत— (केवलं प्रश्नद्वयम्) **1×2=2**

(i) 'तडागः' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

(ii) 'अश्रुप्रवाहैः' इति पदस्य विशेषणपदं किम्?

(ii) 'कुलीरकः' इति कर्तृपदस्य क्रियापदं किं प्रयुक्तम्?

11. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत— **4**

ब्रह्मचारी- तत्र उदयनो नाम राजा प्रतिवसति।

यौगन्धरायणः- श्रूयते तत्रभवान् उदयनः। किं सः ?

ब्रह्मचारी- तस्य अवन्तिराजपुत्री वासवदत्ता नाम पत्नी दृढम् अभिप्रेता किल।

यौगन्धरायणः- भवितव्यम्। ततस्ततः।

ब्रह्मचारी- तस्मिन् आखेटाय निर्गते राजनि ग्रामदाहेन सा दग्धा।

वासवदत्ता - (आत्मगतम्) अलीकम् अलीकं खल्वेतत्। जीवामि मन्दभागा।

यौगन्धरायणः- ततस्ततः

ब्रह्मचारी- ततस्ताम् अभ्यवपत्तु—कामो यौगन्धपरायणो नाम सचिवः तस्मिन् एवाग्नौ पतितः ?

यौगन्धरायणः- सत्यं पतित इति। ततस्ततः।

ब्रह्मचारी- ततः प्रति निवृतो राजा तद्वृतान्तं श्रुत्वा तयोः वियोगजनितसन्तापः तस्मिन् एवाग्नौ प्राणान् परित्यक्तुकामोऽ मात्यैः महता यत्नेन वारितः।

**प्रश्नाः**

(क) एकेन पदेन उत्तरयत— **1/2×2=1**

(i) अवन्तिराजपुत्री का आसीत्?

(ii) आखेटाय निर्गते राजनि केन सा दग्धा?

(ख) पूर्णवाक्येन उत्तरयत—(केवलं प्रश्नैकम्) **1×1=1**

(i) वासवदत्ता आत्मगतं किं चिन्तयति?

(ii) यौगन्धरायणो नाम सचिवः कुत्र पतितः?

(ग) यथानिर्देशम् उत्तरयत—(केवलं प्रश्नद्वयम्) **1×2=2**

(i) 'सचिवैः' इति पदस्य कृते पर्यायपदं किं प्रयुक्तम्?

(i) एवाग्नौ (ii) अमात्यैः (iii) यत्नेन।

(ii) 'सत्यम्' इति पदस्य विलोमपदं किं प्रयुक्तम्?

(i) अलीकम् (ii) दृढम् (iii) आत्मगतम्।

(iii) 'प्रतिवसति' इति क्रियापदस्य कर्तृपदं किम्?

(i) वासवदत्ता (ii) यौगन्धरायणः (iii) उदयनः।

12. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत— (केवल प्रश्नचतुष्टयम्) **1×4=4**

(क) <u>यस्य</u> प्रसूतिं प्रतिपालयन्ति।

(ख) <u>कुलीरकः</u> तत् श्रुत्वा प्राह।

(ग) वृद्धः बकः <u>मत्स्यान्</u> व्यापादयितुम् असमर्थः आसीत्।

(घ) वो गृहे संज्ञानं <u>पुरुषेभ्यः</u>।

(ङ) <u>आचार्याय</u> प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः।

13. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितम् अर्थं चित्वा लिखत—(केवलं प्रश्न-चतुष्टयम्) **1×4=4**

(क) अत्र <u>अभीताः</u> हरिणाः विस्रब्धं विचरन्ति।

(i) निर्भयाः (ii) सभीताः (iii) अर्पिताः।

(ख) आचार्यः अन्तेवासिनम् अनुशास्ति।

(i) अङ्केस्थितम् (ii) शिष्यम् (iii) गुरुम्

(ग) तस्मिन् पुरवरे हृष्टाः धर्मात्मानो बहुश्रुताः।

(i) कुपिताः (ii) क्रूराः (iii) प्रसन्नाः

(घ) तत्किं माम् परित्यज्य अन्यान् नयसि ?

(i) त्यक्त्वा (ii) चित्वा (iii) परिवृत्य।

(ङ) पयोधिना धौतपदः प्रकामम्।

(i) जलदेन (ii) सागरेण (iii) वारिणा।

14. पट्टिकायां प्रदत्तपदैः अधोलिखितां कथां पूरयित्वा पुनः लिखत— **1/2×8=4**

वायसदम्पती, महान्, शृगालं, वृक्षविवरात्, कर्तव्यम्, दुष्टात्मा, उपायः, बालकान्

अस्ति कस्मिंश्चिद् प्रदेशे (i) ________ न्यग्रोधपादपः। तत्र (ii) ________ प्रतिवसतः स्म। अथ तयोः प्रसवकाले (iii) ________ निष्क्रम्य कृष्णसर्पः तदपत्यानि भक्षयति। तौ निर्वेदात् प्रियं सुहृदं (iv) ________ गत्वा ऊचतुः भद्रः! एवंविधे सञ्जाते आवयोः किं (v) ________ भवति ? एषः (vi) ________ कृष्णसर्पः वृक्षविवरात् निर्गत्य आवयोः (vii) ________ भक्षयति। तत् कथ्यतां तद्रक्षार्थं कश्चित् (viii) ________ ।

15. पट्टिकातः यथायोगं पर्यायपदानि विचित्य लिखत— **1/2×4=2**

रुरोद, शरीरम्, स्वर्गे, पूजयत

(क) वपुः ________

(ख) अरोदीत् ________

(ग) सपर्यत ________

(घ) दिवि ________

16. अधोलिखितपदानां विलोमपदानि पट्टिकातः विचित्य लिखत— **1/2×4=2**

क्रुद्धः, अधः, अदेयम्, कटु

(क) ऊर्ध्वम् ________।

(ख) देयम् ________।

(ग) मुदितः ________।

(घ) वल्गु ________ ।

17. अधोलिखितानि विशेषणानि विशेष्यैः सह मेलयत— **1/2×4=2**

| | |
|---|---|
| (क) हिमवान् | (i) शृगालम् |
| (ख) प्रियसुहृदं | (ii) कर्माणि |
| (ग) अनुव्रतः | (iii) गिरिः |
| (घ) अनवद्यानि | (iv) पुत्रः |

18. पट्टिकातः समुचितपदानि चित्वा अधोलिखितस्य श्लोकस्य अन्वयं पूरयित्वा लिखत— **1/2×4=2**

परिरक्षिता, महातेजा, लोकस्य, राजा

यथा मनुर्महातेजा लोकस्य परिरक्षिता।
तथा दशरथो राजा लोकस्य परिरक्षिता।।

अन्वयः— यथा (i) ________ मनुः (ii) ________ परिरक्षिता, तथा (iii) ________ दशरथः लोकस्य (iv) ________ ।

19. अधोलिखितश्लोकस्य भावार्थं पट्टिकातः पदानि चित्वा लिखत— **1/2×4=2**
अनुव्रतः पितुः पुत्रो मात्रा भवतु संमनाः।
जाया पत्ये मधुमतीं वाचं वदतु शन्तिवाम्।।

वाचम्, पितुः, पत्ये, मात्रा

भावार्थः— यस्य पुत्रः (i) ________ अनुव्रतः भवेत्, (ii) ________ संमनाः भवतु, जाया च (iii) ________ माधुर्यवतीं सुखयुक्तां (iv) ________ वदेत्।